# Shri Matri Stuti

# શ્રીમાતૃસ્તુતિઃ

## Document Information

Text title : Shri Matri Stuti

File name : mAtRRistutiH.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Author : Swami Jivananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીમાતૃસ્તુતિઃ

દિવ્યા માતા સુશુદ્ધા હૃદયસમુદયે યાર્ચિતા વન્દનીયા
    માયાહીના મદઘ્ની પરસુખનિલયા પાવની વિશ્વપૂજ્યા ।
નિત્યા શ્રીશારદા સા વિતરતુ વિમલં સત્સુખં મુક્તહસ્તા
    બુદ્ધાં વિજ્ઞાનદાત્રીં જનહિતનિરતાં ચિન્તયેત્ તાં હિ નિત્યમ્ ॥ ૧॥

માતા સૃષ્ટિલયસ્થિતૌ સુનિપુણા કાલી સુશાન્તિપ્રદા
    નિત્યાનન્દમયી હિ યા સુખકરી દુર્ગા વિપત્તારિણી ।
શુદ્ધજ્ઞાનવિધાયિની સુપથદા યા શારદા મોક્ષદા
    ધ્યેયા મઙ્ગલકારિણી સુતરણી દેવી હિ સા ભારતી ॥ ૨॥

તન્વા નમામિ નિતરાં મનસા ચ વાચા
    માતઃ સ્મરામિ તવ દેવિ પદારવિન્દમ્ ।
હે શારદે જનનિ વિશ્વજનસ્ય માતઃ
    દૂરીકુરુ ત્વમચિરં વિપદં ચ દુઃખમ્ ॥ ૩॥

પ્રેમામૃતં તવ પદં ખલુ ચિન્તનીયં
    ભાવાસ્પદં સુવિમલં મહિમાન્વિતં વૈ ।
ધ્યેયં સદા હૃદિ મહાભયવિઘ્નનાશં
    ક્લિષ્ટા નરા જનનિ ! સુષ્ઠુ ભજન્તુ સર્વે ॥ ૪॥

વિશ્વેશ્વરીં વિદિતવિશ્વમનોભિલાષાં
    સન્તપ્તદુઃખહરણક્ષમભક્તિદાત્રીમ્ ।
શ્રુત્યન્તવેદ્યપરમાપ્રકૃતિં મવેશીં
    શ્રી શારદાં નમતુ ના જનનીં સુશાન્તામ્ ॥ ૫॥

વસતુ વસતુ નિત્યં વિશ્વમાતાન્તરે મે
    પિબ પિબ મમ ચિત્તં સ્નેહધારાં જનન્યાઃ ।
વિતરતુ વિમલાં મે શાન્તિધારાં સદામ્બા
    વિમલચરણપદ્મે ભાતુ પૂતા સુભક્તિઃ ॥ ૬॥

સદા માતુર્મૂર્તિં વિમલહૃદયે ધ્યેય ચરિતં
    સુધાપૂર્ણાં વાણીં સ્મર વિપદિ માતુર્હિ પરમામ્ ।
ભવાબ્ધૌ વિક્ષુબ્ધે ત્યજ ચ કઠિનં ભાવમસુખં
    ગૃહાણ ત્વં ભાવં સહજસરલં શાન્તિસુખદમ્ ॥ ૭॥

શક્તિદાત્રીં હિ સઙ્ઘસ્ય શ્રીવૃદ્ધિકારિણીં તથા ।
માતરં શારદાદેવીં ભગવતીં નમામ્યહમ્ ॥ ૮॥

ઇતિ સ્વામિજીવાનન્દવિરચિતા “શ્રીશ્રીમાતૃસ્તુતિઃ” સમાપ્તા ।

Proofread by Aruna Narayanan

---

*Shri Matri Stuti*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*